# संस्कृत वार्ता:

दिनाङ्क : 08/04/2026 सायम् - 06:20

आदौ मुख्यवार्ता:

- अद्य सर्वकारेण फ़ास्फ़ैटिक् तथा पोटैशिक्-उर्वरकयोः कृते अस्य वर्षस्य ग्रैष्मिक इति खरिफ-सस्यानां कृते पोषक-आधारित-अनुदान-मूल्यानि अनुमोदितानि; सहैव एकचत्वारिंशत्-किलोमीटर्-सुदीर्घं जयपुर-मेट्रो-फेज्-द्वितीयमपि अनुमोदितम्।
- पश्चिम-एशिया-द्वन्द्वस्य मध्ये, सम्पूर्णे देशे खनन-क्षेत्रेषु, ऊर्जा-केन्द्रेषु च कृष्णाङ्गारस्य पर्याप्तः भण्डारः वर्तते इति अद्य प्रशासनेन दृढीकृतम्।
- भारतेन अमेरिका-इरान्-देशयोः मध्ये जातस्य संधेः स्वागतं कृतम्; उक्तं च यत् पश्चिम-एशियादेशे चिरस्थायी शान्तिः आगमिष्यति।
- आर्. बी. आई. इत्यनेन बैंकेन रेपो रेट् अपरिवर्तितम् एव स्थापितम्; वर्तमानस्य वित्तवर्षस्य कृते देशस्य वास्तविकं जी. डी. पि. इति वृद्धिः नव दशमलवोत्तर षट् प्रतिशतस्य संभावनापि प्रकटीता ।
- प्रधानमंत्री-मुद्रा-योजनाया: एकादश वर्षाणां पूर्त्यवसरे प्रधानमन्त्रिणा नरेन्द्रमोदिना उक्तम् यत् योजनैषा यूनां मध्ये स्वजीविकोपार्जनं संवर्धनार्थं अत्यधिकं लाभप्रदं सिद्धम् च अस्ति ।
- श्वः असम-केरल-केन्द्रशासितपुदुचेरी-प्रदशेषु विधानसभा-निर्वाचनाय सर्वाः सज्जताः सम्पन्नाः।

-------------------------------------

खरीफ-सत्रम्

अद्य सर्वकारेण फ़ास्फ़ैटिक् तथा पोटैशिक्-उर्वरकयोः कृते अस्य वर्षस्य ग्रैष्मिक इति खरिफ-सस्यानां कृते पोषक-आधारित-अनुदान-मूल्यानि अनुमोदितानि। नवदिल्ल्यां प्रसारमाध्यमान् सम्बोधयन् सूचना-प्रसारण-मन्त्री अश्विनी-वैष्णवः अवदत् यत् अस्यवर्षस्य

खरीफ-सत्रस्य कृते प्रायः सार्ध-एकचत्वारिंशत्सहस्र कोटि-रूप्यकाणां तात्कालिक-आयव्ययकेत्यस्य आवश्यकता भविष्यति। सः अवदत् यत्, अनेन कृषकाणां कृते सुलभमूल्येन उर्वरकानां उपलब्धता सुनिश्चितं भविष्यति।

प्रहलादपुरातः टोडी-मोड्-पर्यन्तं एकचत्वारिंशत् किलोमीटर्-सुदीर्घस्य जयपुर-मेट्रो-फेज्-द्वितीयस्यापि सर्वकारेण अनुमोदनं कृतम्। श्री वैष्णवः अवदत् यत् अस्मिन् षड्त्रिंशत् स्थानकानां समावेशः भविष्यति तथा च अस्यां परियोजनायां त्रयोदश सहस्रकोटिरूप्यकाणां व्ययः भविष्यति। एषा परियोजना राजस्थान-मेट्रो-रेल्-कार्पोरेशन्-लिमिटेड् इत्यनेन कार्यान्वितम् भविष्यति, यत् भारतसर्वकारस्य राजस्थानसर्वकारस्य च समान-संयुक्त-उद्यमः अस्ति।

-------------------------------------

<u>अन्तामन्त्रालयीय-विवरणं</u>

पश्चिम-एशिया-द्वन्द्वस्य मध्ये, सम्पूर्णे देशे खनन-क्षेत्रेषु, ऊर्जा-केन्द्रेषु च कृष्णाङ्गारस्य पर्याप्तः भण्डारः वर्तते इति अद्य प्रशासनेन दृढीकृतम्। नवदिल्ल्यां पश्चिम-एशियायाः वर्तमान स्थित्याम् अन्तामन्त्रालयीय-विवरणं सम्बोधयन् अङ्गारमन्त्रालयस्य संयुक्तसचिवः सञ्जीवकुमारकस्सी इत्येषः अवदत् यत् अङ्गारस्य मूल्ये वृद्धिः नाभवत्। पेट्रोलियम-प्राकृतिकगैस-मन्त्रालयस्य संयुक्तसचिवा सुजाता शर्मा इत्येषा अवदत् यत्, सम्पूर्णे देशे एल्. पी. जी., पेट्रोल्, डीज़ल् इन्धनानि पर्याप्तमात्रायां उपलभ्यन्ते, सामान्या आपूर्तिः अपि प्रचलति।

-------------------------------------

<u>विदेश मंत्रालय संचतेना</u>

अमेरिका-इरान्-देशयोः मध्ये जातस्य संधेः भारतेन स्वागतं कृतम्। एकस्मिन् वक्तव्ये, विदेशमन्त्रालयेन आशा प्रकटिता यत् अनेन पश्चिम-एशियादेशे चिरस्थायी शान्तिः, होर्मुज़्-जलसंधिना नौवहनस्य निर्बाध्य आवागमनं, वाणिज्यस्य वैश्विकप्रवाहः च भविष्यति। मन्त्रालयः अवदत् यत् भारतं निरन्तरं युद्धविरामाय, संवादं, कूटनीतिं च समर्थयति, यत्

संघर्षस्य शीघ्रसमाप्त्यर्थं आवश्यकम् अस्ति। मन्त्रालयेन अग्रे उक्तं यत्, विवादेन पूर्वमेव जनेषु महती क्लेशः अभवत्, वैश्विक-ऊर्जा-आपूर्तिः, व्यापारजालानि च बाधिताः अभवन्। अत्रान्तरे, इरान्-देशस्य स्थित्यानुसारं इरान्-देशे भारतीय-दूतावासेन, सम्प्रति इरान्-देशे स्थितेभ्यः भारतीय-नागरिकेभ्यः, दूतावासेन सह समन्वयेन, दूतावासेन सूचितान् मार्गान् उपयुज्य, इरान्-देशात् शीघ्रं निर्गन्तुं सूचितम् अस्ति। परामर्शपत्रे उक्तं यत् दूतावासेन सह पूर्वपरामर्शेन समन्वयेन च विना कस्यापि अन्ताराष्ट्रिय-स्थलसीमायां प्रविष्टुं प्रयासः न करणीयः। अत्रान्तरे, आधिकारिक-सुचनानां स्थितिं निकटतया निरीक्षितुं भारतीयनागरिकान् दुतावासेन उक्तम्। + 989128109115, + 989128109109, + 989128109102 तथा + 989932179359 इति चरदूरभाष सङ्ख्यासु दूतावासेन सह सम्पर्कं कर्तुं शक्यते। दूतावासस्य ईमेलः संकेतः अस्ति अस्ति। Cons. Tehran@mea.gov.in इति।

---------------------------------------

## भारतीय-रिजर्व्-बैंक

भारतीय-रिजर्व्-बैंकेन पञ्च-दशमलव-पञ्चविंशतिः प्रतिशतं यावत् वृद्धि-मानं अपरिवर्तितम् एव स्थापितम्। वर्तमानस्य वित्तवर्षस्य प्रथमस्य द्वैमासिकस्य मौद्रिकनीतेः घोषणां कुर्वन् आर बी आई अध्यक्षः सञ्जय-मल्होत्रा अद्य अवदत् यत्, मौद्रिकनीति-समितिः सर्वसम्मत्या तटस्थ-स्थित्या रेपोदरं पञ्च-दशमलव-पञ्चविंशतिः प्रतिशतं स्थापयितुं निर्णयम् अकरोत्। परिणामस्वरूपेण, स्थायी-निक्षेप-सौविध्य-दरः पञ्च प्रतिशतं भवति तथा च सीमान्त-स्थायी-सौविध्य-दरः, बैंक-दरः च पञ्च-दशमलव-पञ्चशून्य प्रतिशतं यावत् भवति। मुद्रा-नीति-समितेः अपि अपेक्षा अस्ति यत्, गतवित्तवर्षस्य GDP इति सकल-गृह-उत्पादम् षड् दशमलवोत्तर-सप्त-प्रतिशतं भविष्यति इति।

---------------------------------------

## प्रधानमंत्री मुद्रा योजना

प्रधानमन्त्रिणा नरेन्द्रमोदिना उक्तम् यत् प्रधानमंत्री मुद्रा योजना यूनां मध्ये स्वजीविकोपार्जनं संवर्धनार्थं अत्यधिकं लाभप्रदं सिद्धम् च अस्ति। पञ्चदशधिक-द्विसहस्र-तमे वर्षे आरब्धा इयं योजना अद्य एकादश वर्षाणि पूरयति। सामाजिक-माध्यम-संदेशे श्री मोदी अवदत् यत् योजनायाः सफलतया ज्ञायते यत् यदा जनान् समुचितानि अवसराणि दीयन्ते तदा ते स्वावलम्बी भवितुं शक्नुवन्ति , राष्ट्रस्य प्रगतेः कृते महत्त्वपूर्णं योगदानं च दातुं शक्नुवन्ति। अद्यावधिः प्रधानमन्त्री-मुद्रा-योजनायाः अन्तर्गतं प्रायः अष्टपञ्चाशत् कोटिरूप्यकाणां ऋणानि स्वीकृतानि सन्ति। ऋणस्य तृतीयांशद्वयम् महिला-उद्यमिनां कृते स्वीकृतम् अस्ति। सर्वेषु ऋणेषु प्रायः पञ्चमांशभागः प्रथमवारं नवोद्यमीनां कृते प्रदत्तः अस्ति। मुद्रा-ऋणानि 'शिशु,किशोर,तरुण,तरुण-प्लस' चेत्यादिष' चतुर्वर्गेषु प्रदत्ताः सन्ति, येन ऋणग्रहीतानां वृद्धेः , विकासस्य , वित्तपोषणस्य च आवश्यकता ज्ञायन्ते।

--------------------------------------

<u>विधानसभा मतदानस्य</u>

श्वः असम-केरल-केन्द्रशासितपुदुचेरी-प्रदशेषु विधानसभा-निर्वाचनाय सर्वाः सज्जताः सम्पन्नाः जाताः। असमराज्ये षड्विंशत्यधिक-शत्-आसनानां कृते, केरलं-राज्ये चत्वारिंशदधिक-शत्-आसनानां कृते, पुदुचेरी-राज्ये च त्रिशंत्-आसनानां कृते निर्वाचनं भविष्यति। स्वतन्त्रं, निष्पक्षं, शान्तियुतं च मतदानं निश्चेतुं सुरक्षाव्यवस्थाः दृढीकृतानि, प्रशासनिक-उपायानि च प्रयुज्यन्ते। एतदतिरिच्य, तमिलनाडुराज्ये एकचरणीय मतदानस्य, पश्चिमबंगालराज्ये च प्रथम-चरणस्य मतदानस्य नामाङ्कनपत्राणां प्रत्यावर्तनस्य श्वः अन्तिमः दिवसः अस्ति। पश्चिमबङ्गालराज्ये द्वितीयस्य चरणस्य नामाङ्कनपत्रस्य कृते अपि श्वः एव अन्तिमः दिवसः वर्तते।

--------------------------------------

<u>आईपीएल</u>

आई. पी. एल्. क्रिकेट्-क्रीडायां, दिल्ल्याः अरुण जेटली-क्रीडाङ्गणे अद्य दिल्ली-कैपिटल्स दलं गुजरात्-टायटन्स्- इत्यमुं सम्मुखी करिष्यति। स्पर्धायाः आरम्भः सायं सार्द्ध सप्तवादने भविष्यति।

।। इति वार्ता: ।।